# Shri Rishyashringa Ashtakam

# શ્રીઋષ્યશૃઙ્ગાષ્ટકમ્

## Document Information

Text title : Rishyashringa Ashtakam

File name : RRiShyashRRingAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : Nrisimhabharati Mahasvami

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# શ્રીઋષ્યશ ૃઙ્ગાષ્ટકમ્

શ્રીઋષ્યશ ૃઙ્ગમુનયે કરુણાકરાય
સદ્યઃ સુવૃષ્ટિપરિવર્ધનકારણાય ।
શાન્તાધિપાય શતમન્યુસુપૂજિતાય
શ્રીમદ્વિભાણ્ડકસુતાય સદા નમસ્તે ॥ ૧॥

શાન્ત્યાદિસાધનસુપૂરિતમાનસાય
કાન્તાય કન્તુપરિસેવિતપાદુકાય ।
ક્ષુત્ક્ષાન્તલોકપરિરક્ષણપણ્ડિતાય
સર્વાર્થદાય ગુરવે ઋષયે નમસ્તે ॥ ૨॥

સર્વાત્મકાય કલિદોષવિશોષણાય
વિદ્યાભિવેદ્યચરણાય સુવર્ષણાય ।
પાપાપહાય પરિતાપનિવારણાય
બ્રહ્માત્મબોધજનકાય નમો નમસ્તે ॥ ૩॥

રક્ષોઘ્નમન્ત્રપરિતર્જિતરાક્ષસાય
શ્રીસૂર્યવંશપરિવર્ધનદીક્ષિતાય ।
તુઙ્ગાનદીતટનિવાસસમુત્સુકાય
ચન્દ્રાનનાય મુનયે સતતં નમસ્તે ॥ ૪॥

તુઙ્ગાઙ્ગદેશદુરવગ્રહનિગ્રહાય
જીમૂતજાતપરિકર્ષણતત્પરાય ।
દૈન્યાપહાય ધનધાન્યસમૃદ્ધિદાય
તસ્મૈ નમો ભગવતે જગતાં હિતાય ॥ ૫॥

વિપ્રોત્તમાય વિદુષાં પરિતોષણાય
સત્યાદિપોષણરતાય સદાત્મકાય ।
કાવ્યાર્થસારહૃદયાય કવિપ્રિયાય
તસ્મૈ નમોઽસ્તુ સતતં વિદુષાં વરાય ॥ ૬॥

કલ્યાણશીલકલિતાય કલાન્વિતાય
મન્દસ્મિતાસ્યકમલાય મનોહરાય ।
ધર્માર્થકામવરમોક્ષફલપ્રદાય
નિત્યં નમોઽસ્તુ પરમેશ્વરપૂજકાય ॥ ૭॥

રાજાધિરાજપરિસન્નુતવૈભવાય
ભવ્યાય દિવ્યસુગુણાય શુભપ્રદાય ।
સર્વાઙ્ગસુન્દરકલેબરશોભિતાય
શ્રુત્યેકવેદ્યનિજરૂપવિદે નમસ્તે ॥ ૮॥

શૃઙ્ગાન્વિતાય વરમઙ્ગલકારકાય
શ્રીચન્દ્રચૂડકરુણારસપોષિતાય ।
આશ્ચર્યદિવ્યચરિતાય મૃગીસુતાય
મૃત્યુઞ્જયાય મહતે સતતં નમસ્તે ॥ ૯॥

શ્રીશારદાપદસરોજમુપાસિતેન
શ્રીશઙ્કરાર્યવરપીઠસુસંસ્થિતેન ।
સચ્ચિત્સુખાત્મકગુરોઃ કરસમ્ભવેન
સ્તોત્રં કૃતં સુખકરં હિ નૃસિંહનામ્ના ॥ ૧૦॥

ઋષ્યશૃઙ્ગમુનેસ્સ્તોત્રં યત્ર યત્ર હિ પઠ્યતે ।
તત્ર તત્ર સુવૃષ્ટિઃ સ્યાદ્ધનધાન્યસમૃદ્ધિદા .. ..

ઇતિ શૃઙ્ગેરીજગદ્ગુરુ શ્રીશ્રીશ્રી નૃસિંહભારતીમહાસ્વામિભિઃ
વિરચિતં શ્રીઋષ્યશૃઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ॥

*Shri Rishyashringa Ashtakam*
pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*